# केन्द्रीय विद्यालय सीतापुर

## प्रथम–सावधिकं–मूल्यांकनम्

समय–सार्द्धैकहोरा कक्षा– अष्टमी

---

| | | |
|---|---|---|
| खण्डः– क | अपठित–अवबोधनम् | 06 अंकाः |
| खण्डः –ख | रचनात्मकं कार्यम् | 08 अंकाः |
| खण्डः – ग | अनुप्रयुक्तं व्याकरणम् | 12 अंकाः |
| खण्डः – घ | पठित–अवबोधनम् | 14 अंकाः |
| | | कुल 40 अंकाः |

**छात्रस्य नाम** ....................................... **दिनाङ्क** .......................................

**कक्षा एवं वर्ग** ....................................... **अनुक्रमांक** ....................................

**निरीक्षकस्य हस्ताक्षर** ..........................................

निर्देश -

अस्मिन् प्रश्न पत्रे उपर्युक्ताः चत्वारः खण्डाः सन्ति।

प्रश्नानां उत्तराणि प्रश्न पत्रे प्रदत्तेषु स्थानेष्वेव लेखनीयानि।

## खण्ड'क' अपठित अवबोधनम् (6 अंकाः)

प्रश्नः–1 गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

भारते अनेकाः नद्यः सन्ति। तासु गङ्गा पवित्रतमा अस्ति। गङ्गा हिमालयात् निस्सरति। विभिन्न प्रान्तेषु भूत्वा गङ्गा बङ्गालप्रदेशे सागरं प्रविशति। जनाः गङ्गां माता इव पूजयन्ति। किन्तु वर्तमान-समये जनाः गङ्गां प्रदूषितां कुर्वन्ति। ते गङ्गायां पुष्पदीपकान् प्रवाह्य जलं दूषितं कुर्वन्ति। ते गङ्गायां अवकरं अपि क्षिपन्ति। एवं न करणीयम्। अद्यत्वे प्रधानमन्त्री महोदयेन गङ्गायाः स्वच्छतायै एका योजना परिचालिता येन वयं गङ्गायाः संरक्षणं कर्तुं समर्थाः भविष्यामः।

एकपदेन उत्तरत– **(1×4=4)**

क) भारते अनेकाः काः सन्ति?

.......................................................................

ख) गङ्गा कुतः निस्सरति?

.......................................................................

ग) के गङ्गां प्रदूषितां कुर्वन्त?

.......................................................................

घ) जनाः गङ्गायां किं क्षिपन्ति?

.......................................................................

पूर्णवाक्येन उत्तरत– **(2×1=2)**

क) केन गङ्गायाः स्वच्छतायै एका योजना परिचालिता?

.......................................................................................................................................

.......................................................................................................................................

## खण्ड ख रचनात्मक–कार्यम् (8 अंकाः)

प्रश्नः–2 रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (1×4=4)

(क) भोजपत्रोपरि <u>लेखनम्</u> आरब्धम्।

प्रश्नः–.......................................................................................?

(ख) सर्वाणि पत्राणि <u>चलदूरभाषयंत्रे</u> सुरक्षितानि भवन्ति।

प्रश्नः–.......................................................................................?

(ग) <u>विश्रामगृहेषु</u> कक्षं सुनिश्चितं भवेत्।

प्रश्नः–.......................................................................................?

(घ) वयम् <u>उपचारार्थं</u> चिकित्सालयं गच्छामः।

प्रश्नः–.......................................................................................?

प्रश्नः–3 अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत– (1×4=4)

(क) **परितः** –.......................................................................................

(ख) **पुरतः** –.......................................................................................

(ग) **नगः** – .......................................................................................

(घ) **नागः** .......................................................................................

## खण्ड'ग' अनुप्रयुक्त–व्याकरणम्–(12 अंकाः)

प्रश्न–4 उदाहरणानुसारं पदानि पृथक् कुरूत– **(1×4=4)**

यथा– समानमपि– समानम् + अपि

(क) अल्पमेव ..........................................+.................................

(ख) सर्वमेव ........................................+........................................

(ग) माधुर्यमेव ........................................+........................................

(घ) महात्मनामुक्तिः........................................+........................................

**प्रश्न–5. लट्लकारपदेभ्यः कृते लोट्–विधिलिङ्लकारपदानां निर्माणं कुरुत–** (**1/2×8=4**)

| लट्लकारे | लोट्लकारे | विधिलिङ्लकारे |
| --- | --- | --- |
| यथा– पठति | पठतु | पठेत् |
| (क) पिबामि | ............................................ | ............................................ . |
| (ख) हसतः | ............................................ | ............................................ |
| (ग) नयामः | ............................................ | ............................................ |
| (घ) खादन्ति | ............................................ | ............................................ |

**प्रश्न–6 मंजूषातः क्रियापदानि चित्वा रिक्तस्थानानि पूरयत–** (**1×4=4**)

| भज ,कुरू , देहि, विधेहि |
| --- |

(क) .....................................................गोविन्दम्।

(ख) महयं जलं.................................................. ।

(ग) सततं ध्येयस्मरणं....................................... ।

(घ) राष्ट्रे अनुरक्तिम्........................................ ।

## खण्ड'घ' पठित अवबोधनम्(14–अंकाः)

**प्रश्न–7 गद्यं पठित्वा उत्तराणि लिखत–**

कस्मिंश्चित् वने खरनखरः नाम सिंहः प्रतिवसति स्म। सः कदाचित् इतस्ततः परिभ्रमन् क्षुधार्तः न किञ्चिदपि आहारं प्राप्तवान्। ततः सूर्यास्तसमये एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्–''नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढो भूत्वा तिष्ठामि'' इति।

एतस्मिन् अन्तरे गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्। स च यावत् पश्यति तावत् सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते, न च बहिरागता। शृगालः अचिन्तयत्–''अहो विनष्टोऽस्मि। नूनम् अस्मिन् बिले सिंहः अस्तीति तर्कयामि।

**एकपदेन उत्तरत–** (1×2=2)

1. सिंहस्य नाम किम्? उत्तरम्–.................................................................................. ।
2. गुहायाः स्वामी कः आसीत्? उत्तरम्–.................................................................................. ।

पूर्णवाक्येन उत्तरत– **2**

1. शृगालः गुहायां किम् दृष्टवान्?

उत्तरम्–..............................................................................................................................................

.............................................................................................................................................. ।

प्रश्नः–8 उचित कथनानां समक्षम् आम् अनुचितकथनानां समक्षं न इति लिखत– **(1×4=4)**

| | |
|---|---|
| निजनिकेतनं गिरिशिखरे अस्ति। | |
| स्वकीयं बलं बाधकं भवति। | |
| गमनं सुकरम् अस्ति। | |
| पथि हिंस्रा पशवः न सन्ति। | |

**प्र.viii) घटना क्रमानुसारं वाक्यानि लिखत-- 1x6=6**

(क) गुहायाः स्वामी दधिपुच्छः नाम शृगालः समागच्छत्।

(ख) सिंहः एकां महतीं गुहाम् अपश्यत्।

(ग) परिभ्रमन् सिंहः क्षुधार्तो जातः।

(घ) दूरस्थः शृगालः रवं कर्त्तुमारब्धः।

(ङ) सिंहः शृगालस्य आह्वानमकरोत्।

(च) दूरं पलायमानः शृगालः श्लोकमपठत्।

1 .............................................................................................................................. ।

2 .............................................................................................................................. ।

3 .............................................................................................................................. ।

4 .............................................................................................................................. ।

5 .............................................................................................................................. ।

6 .............................................................................................................................. ।